"कृमिकीटवयोहत्या मद्यानुगतभोजनम् ।
फलैधःकुसुमस्तेयमधैर्य्यञ्च मलावहम् ॥"

मलारिः, पुं, ( मलस्यारिर्नाशको रेचकत्वात् । ) सर्ज्जक्षारः । इति राजनिर्घण्टः ॥

मलिनं, त्रि, (मलते धारयतीति । मल + "बहुलमन्यत्रापि ।" उणा० २ । ४८ । इति इनन् । यद्वा, "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इत्यत्र । "मलशब्दादिनज्मीमसचौ प्रत्ययौ निपात्येते।" इति काशिकोक्त्या इनच् । ) मलयुक्तवस्तु । तत्पर्य्यायः । मलीमसम् २ कच्चरम् ३ मलदूषितम् ४ । इत्यमरः । ३ । १ । ५५ ॥ ( यथा, महानिर्व्वाणतन्त्रे । १ । ४३ ।
"परस्त्रीहरणे पापशङ्काभयविवर्ज्जिताः ।
निर्धना मलिना दीना दरिद्राश्चिररोगिणः ॥")
दूषितम् । ( यथा, आर्य्यासप्तशत्याम् । ४०२ ।
"पटपट इव रजकीभिर्मलिनो मुक्तापि निर्द्दयं ताभिः ।
आर्य्यग्रहणेन विना जघन्य ! मुक्तोऽसि कुलटाभिः ॥")
कृष्णम् । इति मेदिनी । ने, १०४ ॥ नित्यनैमित्तिकक्रियात्यागी । इति मार्कण्डेयपुराणम् ॥ ( निकृष्टम् । यथा, शिशुपालवधे । ६ । २३ ।
"द्युतिमग्रहीद्‌ग्रहगणो लघवः
प्रकटीभवन्ति मलिनाश्रयतः ॥"
"मलिनाश्रयतः निकृष्टाश्रयणात् ।" इति तट्टीकायां मल्लिनाथः ।)

मलिनं, क्ली, ( मलते धरति दोषमिति । मल + इनच् ।) घोलम् । इति शब्दचन्द्रिका ॥ दोषः । इति हेमचन्द्रः ॥ टङ्कणः । इति राजनिर्घण्टः ॥

मलिनमुखः, पुं, ( मलिनं मुखमग्रभागो यस्य । ) अग्निः । गोलाङ्गूलः । इति मेदिनी । खे, १८ ॥ प्रेतः । इति हेमचन्द्रः ॥

मलिनमुखः, त्रि, ( मलिनं दूषितं मुखं यस्य । ) क्रूरः । खलः । इति मेदिनी । खे, १८ । हेमचन्द्रश्च ॥ म्लानवदनश्च ॥

मलिनाम्बु, क्ली, ( मलिनं कृष्णवर्णं अम्बु । ) मसी । इति हेमचन्द्रः । ३ । ४८ ॥

मलिनास्यः, त्रि, ( मलिनं दूषितमास्यं यस्य । ) खलः । इति शब्दमाला ॥

मलिनी, स्त्री, ( मलमस्या अस्तीति । मल + इनिः । स्त्रियां ङीप् । ) रजस्वला नारी । इत्यमरः । २ । ६ । २० ॥

मलिम्लुचः पुं. ( मली सन् म्लोचतीति । म्लुच् इर् गत्याम् + कः ।) मलमासः । यथा,—
"तमतिक्रम्य तु रविर्यदा गच्छेत् कथञ्चन ।
आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्रकृतः स्मृतः ॥
यदा तं दर्शान्तमासमतिक्रम्य तत्पूर्व्वमासान्यचन्द्रत्तिराशिस्थः सन् सूर्य्योऽनिवाह्य गच्छेत् मासान्तरे राश्यन्तरसंयोगं गच्छेत् तदा आद्योऽतिक्रान्तमासो मलिम्लुचो ज्ञेयः । मली सन् म्लोचति गच्छतीति मलिम्लुचः । द्वितीयस्तु प्रकृतः शुद्धः कर्म्मार्हत्वात् ।" इति मलमासतत्त्वम् ॥ अग्निः । चौरः । इति मेदिनी । चे, २१ ॥ ( यथा, माघे । १६ । ५२ ।
"प्रहितः प्रधनाय माधवानहमाकारयितुं महीभृता ।
न परेषु महौजसश्छलादपकुर्व्वन्ति मलिम्लुचा इव ॥")
वायुः । इति शब्दमाला ॥ ( पञ्चयज्ञपरिभ्रष्टः । इति हेमचन्द्रः । ३ । ५२२ ॥ )

मलिष्ठा, स्त्री, ( अतिशयेन मलिनी । मलिनी + इष्ठः । स्त्रियां टाप् । ) रजस्वला नारी । इति त्रिकाण्डशेषः ॥

मलीमसं, क्ली, ( मलमस्यास्तीति । मल + "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इति ईमसच् प्रत्ययेन निपातितः । ) लौहम् । पुष्पकासीसम् । इति मेदिनी । से, ५६ ॥

मलीमसः, त्रि, ( मलमस्यास्तीति । मल + ईमसच् । निपात्यते । ) मलिनः । इत्यमरः । ३ । १ । ५५ ॥ ( यथा, माघे । १ । ३८ ।
"उपप्लुतं पातुमदो मदोद्धतैस्त्वमेव विश्वम्भर ! विश्वमीशिषे ।
ऋते रवेः क्षालयितुं क्षमेत कः
क्षपातमस्काण्डमलीमसं नभः ॥"
कृष्णवर्णः । यथा, श्रीकण्ठचरिते । ६ । ३८ ।
"मलीमसश्रीर्मधुपानसक्तो
भेजे लताः पुष्पवतीः स्फुटं यः ।
स एव चैत्रेण बत द्विरेफः
पुष्पेषुराज्ये विहितः पुरोधाः ॥")

मलूकः, पुं, ( मल + बाहुलकात् ऊकः । ) कृमिविशेषः । इत्युणादिकोषः ॥

मल्ल, ङ धृतौ । इति कविकल्पद्रुमः ॥ ( भ्वा० आत्म० सक० सेट् । ) ङ, मल्लते । इति दुर्गादासः ॥

मल्लः, पुं, (मल्लते धरति बलमिति । मल्ल् + अच् ।) बाहुयोधी । इत्यमरभरतौ । माल इति भाषा ॥ ( यथा, श्रीमद्भागवते । १० । ४३ । १७ ।
"मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान् ॥")
वर्णसङ्करजातिविशेषः । माला इति भाषा । स च व्रात्यक्षत्त्रियात् सवर्णायां जातः । इति मानवे १० अध्यायः ॥ स च लेटात् तीवरकन्यायां जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तन्त्रवाय्यां कुन्दकाराज्जातः । इति पराशरपद्धतिः ॥ पात्रम् । कपोलम् । मत्स्यभेदः । इति मेदिनी । ले, ४४ ॥ देशविशेषः । यथा,—
"दशार्णा नवराष्ट्रञ्च मल्लाः शाल्वा युगन्धराः ॥"
इति विराटपर्व्वणि १ अध्यायः ॥

मल्लकः, पुं, ( मल्ल इव । मल्ल + कन् । दृढत्वादस्य तथात्वम् । यद्वा, मल्ल धारणे + ण्वुल् । ) दन्तः । इति हेमचन्द्रः । ३ । २८४ ॥ ( ब्राह्मणविशेषः । यथा, राजतरङ्गिण्याम् । ८ । ७३२० ।
"विलोक्य वैक्लव्यहतौ बद्धौ तौ स्वामिनौ तथा ।
कृष्टासिर्धेनुरुत्तस्थौ द्विजन्मा मल्लकाभिधः ॥")

मल्लकः, पुं, स्त्री, ( मल्लते धारयति प्रदीपमिति । मल्ल् + ण्वुल् । ) दीपाधारः । नारिकेलफलावयवजपात्रविशेषः । माला इति भाषा । स्त्रियां मल्लिका । इत्यमरभरतौ ॥ प्रदीपः । इति मथुरेशः ॥

मल्लजं, क्ली, ( मल्ले तदाख्यदेशे जायते इति । जन् + डः । ) मरिचम् । इति जटाधरः ॥

मल्लतूर्य्यं, क्ली, ( मल्लैर्वाद्यमानं तूर्य्यम् । मल्लाय तूर्य्यमिति वा । ) वाद्यविशेषः । तत्पर्य्यायः । मड्डाखनः २ । इति त्रिकाण्डशेषः ॥

मल्लनागः, पुं, (नागो हस्तीव मल्लः । पूर्व्वनिपातः ।) वात्स्यायनमुनिः । ( मल्लो बलीयान् नागः । ) ऐरावतः । इति मेदिनी । गे, ५७ ॥ (मल्लो नाग इव ।) लेखहारः । इति शब्दरत्नावली ॥ कामशास्त्रविशेषः । इति धरणिः ॥

मल्लभूः, स्त्री, ( मल्लानां भूर्भूमिः । ) मल्लभूमिः । इति जटाधरः ॥

मल्लभूमिः, स्त्री, ( मल्लानां भूमिः स्थानम् । ) मल्लक्रीडास्थानम् । तत्पर्य्यायः । अक्षवाटः २ रङ्गभूमिः ३ रणस्थली ४ । इति शब्दरत्नावली ॥ मल्लभूः ५ अक्षपाटः ६ । इति जटाधरः ॥ देशविशेषश्च ॥ (यथा,—
"अयःपात्रे पयःपानं शालपत्रे च भोजनम् ।
शयनं तालपत्रे च मल्लभूमेरियं गतिः ॥"
इत्युद्भटः ॥)

मल्लयात्रा, स्त्री, ( मल्लानां यात्रा । ) मल्लानां युद्धार्थयात्रा । तत्पर्य्यायः । माल्लवी २ । इति हारावली ॥

मल्लयुद्धं, क्ली, (मल्लानां युद्धम् ।) मल्लानां संग्रामः । तत्पर्य्यायः । नियुद्धम् २ बाहुयुद्धम् ३ । इति शब्दरत्नावली ॥ तत्प्रकारो यथा,—
"अथ सूदेन तं मल्लं योधयामास मत्स्यराट् ।
चोद्यमानस्ततो भीमो दुःखेनैवाकरोन्मतिम् ॥
नहि शक्नोति विवृतं प्रत्याख्यातुं नराधिपम् ।
ततः स पुरुषव्याघ्रः शार्दूलशिथिलञ्चरन् ॥
प्रविवेश महारङ्गं विराटमभिपूजयन् ।
बबन्ध कक्षां कौन्तेयस्ततः संहर्षयन् जनान् ।
ततस्तं वृत्रसङ्काशं भीमो मल्लं समाह्वयत् ॥
जीमूतं नाम तं मल्लं तत्र प्रख्यातविक्रमम् ।
तावुभौ सुमहोत्साहावुभौ तीव्रपराक्रमौ ॥
मत्ताविव महाकायौ वारणौ षष्टिहायनौ ।
ततस्तौ नरशार्दूलौ बाहुयुद्धं समीयतुः ॥
वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ ।
आसीत् सुभीमः सम्पातो वज्रपर्व्वतयोरिव ॥ १० ॥
उभौ परमसंहृष्टौ बलेनातिबलावुभौ ।
अन्योन्यमन्तरप्रेप्सू परस्परजयैषिणौ ॥
उभौ परमसंहृष्टौ मत्ताविव महागजौ ।
कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सकङ्कटैः ॥ ११ ॥
सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा ।
क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्वनैः ॥
तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च ।
शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः ॥